## सेंट मारग्रेट सीनियर सेकंडरी स्कूल

## डी ब्लॉक, प्रशान्त विहार, रोहिणी, दिल्ली - 110085.

### आदर्श प्रश्न पत्र

**कक्षा : नवमी** **विषय: - संस्कृतम्**

**अवधि: - होरात्रयम्** **पूर्णाका: - 80**

**निर्देशा: -** (1) **प्रश्नपत्रे चत्वारः खण्डा: सन्ति।**

**खण्ड:** (क) **अपठित-अवबोधनम् - 10 अङ्का:** **खण्ड:** (ख) **- रचनात्मककार्यम् – 15 अङ्का:**

**खण्ड:** (ग) **- अनुप्रयुक्त-व्याकरणम् – 25 अङ्का:** **खण्ड:** (घ) **- पठित-अवबोधनम् - 30 अङ्का:**

(2) **सर्वे प्रश्ना: अनिवार्या: ।** (3) **प्रश्नानां उत्तराणि खण्डानुसारम् क्रमेणैव लेखनीयानि।**

(4) **प्रश्नसंख्या अवश्यम् लेखानीया।** (5) **उत्तराणि संस्कृतेन एव लेखनीयानि।**

**[ खण्ड:** (क) **अपठित-अवबोधनम् - 10 अङ्का:]**

**प्रश्न 1.अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्त प्रश्नानानाम् उत्तराणि लिखत :-**

आदर्शरामचरितस्य लेखकः वाल्मीकिः जनमानसस्य हृदये प्रतिष्ठितः। एकदा तमसातीरे भ्रमता सः निषादेन विध्यमानमेकं क्रौञ्चपक्षिणमपश्यत्। करुणाभिभूतस्य तस्य मुखात् अनुष्टुप् छन्दसि श्लोकः नि:सृतः। तदा ब्राह्मणः आदेशेन सः अस्मिन् छन्दसि रामायणमहाकाव्यम् अलिखत्। रामायणे मर्यादापुरुषोत्तमस्य रामस्य चरित्रं निबद्धम्। पित्रोः आज्ञया रामः चतुर्दशवर्षाणि वने अवसत्। रामायणे तत्कालीन समाज व्यवस्थायाः विशदं वर्णनं प्राप्यते। अस्य ग्रन्थस्य विश्वस्य अनेकासु भाषासु अनुवादः कृतः। अस्य कथानकमाश्रित्य संस्कृतस्य अनेके कवयः ग्रन्थान् अरचयन्। अस्य ग्रन्थस्य पाठं जनाः प्रतिदिनं कुर्वन्ति। रामायणे सप्तकाण्डानि चतुर्विंशतिसहस्त्रश्लोकाश्च सन्ति।

I. एकपदेन उत्तरत **-** **(1x2=2)**

(i) वाल्मीकिः निषादेन विध्यमानं क्रौञ्चपक्षिणं कुत्र अपश्यत्? (ii) कस्मिन् छन्दसि रामायणं लिखितम्?

II. पूर्णवाक्येन उत्तरत **-** **(2x2=4)**

(i) रामायणे कति काण्डानि, कति श्लोकाश्च सन्ति? (ii) रामायणे कस्याः विशदं वर्णनं प्राप्यते?

III. निर्देशानुसारम् उत्तरत **-** **(1x3=3)**

(i) 'संस्कृतस्य अनेके कवयः ग्रन्थान् अरचयन्।' अत्र 'अरचयन्' इति क्रियापदस्य कर्तृपदं किम्?

(क) ग्रन्थान् (ख) कवयः (ग) अनेके (घ) संस्कृतस्य

(ii) 'रामायणे मर्यादापुरुषोत्तमस्य रामस्य चरित्रं निबद्धम्' अत्र 'रामस्य' इति पदस्य किं विशेषणपदं प्रयुक्तम्?

(क) रामस्य (ख) मर्यादा (ग) मर्यादापुरुषोत्तमस्य (घ) चरित्रम्

iii) 'निषादेन' इति पदस्य पर्यायपदं किम्?

(क) व्याधेन (ख) हर्षेण (ग) करुणा (घ) मर्यादा

IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं **लिखत।** **(1)**

## खण्डः (ख) - रचनात्मककार्यम् – 15 अङ्काः

**प्रश्न 2.भवान् अरविन्दः। ग्रीष्मावकाशे भ्रमणाय स्वमित्रं प्रति लिखितम् इदं पत्रं मञ्जूषायां प्रदत्तैः उचितैः शब्दैः पूरयित्वा पुनः लिखत -** **(1x10=5)**


आनन्दविहारः
नवदिल्लीतः
प्रिय मित्र (i)………

तिथिः .........

नमोनमः।
अत्र कुशलं (ii) …………..। भवतः पत्रम् पठित्वा चित्तम् प्रासीदत्। अधुना (iii) ………… अस्ति यत् अहं (iv) …………उत्तीर्णः अभवम्। आशास्ति त्वमपि उत्तमश्रेण्यां (v) ………… भविष्यसि। अहं (vi………… भवतां समीपम् आगन्तुम् इच्छामि। अहं (vii) ………… सह ग्रीष्मावकाशं मसूरीनगरे यापयिष्यामि। तत्र हिमाच्छादिताः (viii)………… जनान् आकर्षयन्ति। अहमपि तत्र प्राकृतिकदृश्यस्य (ix) .. . कर्तुम् इच्छामि। गृहे माता-पित्रोः (x) …… मम प्रणामाः।
भवदीयं मित्रम्
अरविंदः

| **<u>मञ्जूषा-</u>** मित्रैः, गौरव, प्रथमश्रेण्यां, ग्रीष्मावकाशे, उत्तीर्णः, पर्वतश्रृंखलाः, अवलोकनं, तत्रास्तु, समाचारः, चरणयोः |
|---|

**प्रश्न 3.अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत - (1x5=5)**



| **<u>मञ्जूषा</u>** -उड्डीयते, नरम्, कूपात्, पाययति, काकः, गगने खगाः, जलं, वृक्षस्य, एका महिला, रज्ज्वा, प्रतीक्षते, निष्कासयति, उपरि, द्विमहिले। |
|---|

अथवा

**'क्रीडायाः महत्त्वम्' इति विषयम् अधिकृत्य मंजूषायाम् प्रदत्त-शब्दानाम् सहायतया संस्कृतेन पञ्चवाक्यानि वाक्यानि लिखत।** **(1x5=5)**

**मंजूषा**

| महत्त्वपूर्णम् , सर्वेभ्यः , अनिवार्यम् , स्वास्थ्याय, जीवनम् , संयमः , स्थानम् , सफलाः , जनाः , क्रीडा |
|---|

**प्रश्न 4.अधोलिखितायां कथायां मञ्जूषायाः पदानि अवचित्य रिक्तस्थानपूर्तिः क्रियताम् – (1x10=5)**

एकदा ऋषिः दयानन्दः वैदिकधर्मस्य प्रचारं कुर्वन् अनूपशहर नामकम् एकं (i) ……………. अगच्छत्। तत्र तस्य सत्सङ्गे अनेके नराः नार्यः च आगत्य तस्य अमृतवचनं श्रुत्वा (ii) ……………. धन्यं कुर्वन्ति स्म। अतः तस्य अनुयायिनां सङ्ख्या अपि अवर्धत। ते सर्वे ऋषिं प्रति (iii) …………….. अपि धारयन्ति स्म। एतद् दृष्ट्वा तस्य विरोधिनः ईर्ष्या दग्धाः अभवन्। ते स्वामिदयानन्दं (iv)

…………….. अपि प्रयत्नम् अकरोत्। एकस्मिन् दिवसे एकस्मै युवकाय (v) …………….. दत्वा तस्य हस्तेन ऋषि दयानन्दं ताम्बूले विषम् प्रदापयन्। एतत् ज्ञात्वा योगविद्यया (vi) …………….. च ऋषिः तद् विषं बहिः निस्सार्य स्वस्थाने आगच्छत्। इदं वृत्तान्तं ज्ञात्वा स्वामिदयानन्दस्य (vii) ……………. आरक्षकः निरीक्षक: (पुलिसनिरीक्षक) सैयद मोहम्मदः तम् (viii) ……………. बन्ध नेन बद्ध्वा स्वामिनः समीपं नीतवान्। दण्डार्थञ्च स्वामिने निवेदितवान्। एतच्छ्रुत्वा ऋषिः गम्भीरस्वरेण अकथयत्-'भवान् एनं मुञ्चतु' अहं कञ्चिदपि जनं बंधने पतयितुं न आगच्छम् अपितु संसारं (ix) …………….. मोक्तुम् आगतवान्।' एतत् कथयित्वा सः तं बन्धनात् मोक्तवान्। धन्यः आसीत् सः ऋषिः (x) …………….. सरस्वती।

| |
|---|
| **<u>मञ्जूषा –</u>** अपराधिनम्, धनम्, मुस्लिमभक्तः, नगरम्, बन्धनात्, मारयितुम्, ! न्यौलीक्रियाया, स्वामिदयानन्द, भक्तिभावम्, आत्मानं। |

**[ खण्डः (ग) - अनुप्रयुक्त-व्याकरणम् – 25 अङ्काः]**

**प्रश्न 8. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : -** **(1x5=5)**

1. 'लभ' धातोः लट् लकारस्य प्रथम पुरुषे द्विवचने रूपं भविष्यति।

(क) लभताम् (ख) अलभत (ग) अलभे (घ) लभेते

2. ''भू' धातोः विधिलिङ्लकारमध्यम पुरुषकवचने रूपं भविष्यति।
(क) भवेत् (ख) भवतु (ग) भवे: (घ) भवेम

3. 'अस्' धातोः लङ् लकारस्य प्रथमपुरुषबहुवचने रूपं भविष्यति।
(क) आसीत् (ख) आसन् (ग) आसी: (घ) आस्तम्

4. गम् धातोः लोट् लकारे मध्यम पुरुष एकवचने रूपं भवति*
(क) गच्छ (ख) गच्छस्व (ग) गमस्व (घ) गच्छद्व

5. त्वं बुद्धिमान् ------------। (अस् धातु , लोट्लकार)

(क) स्यात् (ख) स्ताम् (ग) एधि (घ) अस्तु

**प्रश्न 6. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा रिक्तास्थानानि पूरयत :-** **(1x5=5)**

(i) --------------- गङ्गा सर्वश्रेष्ठा अस्ति।

(क) नदीषु (ख) नदीम् (ग) नद्याम् (घ) नद्या

(ii) ------------------ पुष्पाणि शोभते।

(क) लताया (ख) लतासु (ग) लताभि: (घ) लताभ्य:

(iii) सोहन: --------------- फलानि आनयति।

(क) मुनये (ख) मुने (ग) मुनि (घ) मुनिम

(iv) ------------ शिवाय नमः।

(क) तस्य (ख) तस्मै (ग) तस्मिन् (घ) तेन

(v) ' बालके' पदे का विभक्ति अस्ति ?

(क) प्रथमा (ख) तृतीया (ग) चतुर्थी (घ) सप्तमी

**प्रश्न 9. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : - (1x4=4)**

1. जननी जन्मभूमिश्च स्वर्गात् + अपि गरीयसी।
क. स्वर्गातपि ख. स्वर्गात्तपि ग. स्वर्गादपि घ. स्वर्गादपी
2. एषा कथा हित + उपदेशात् गृहीता।
क. हितउपदेशात ख. हितुपदेशात ग. हितेपदेशात घ. हितोपदेशात्
3. वृक्षाणां फलान्यपि परोपकाराय भवन्ति।
क. फल + अपि ख. फलानि + अपि ग. फल + अन्यापि घ. फलानी + अपि
4. भवन्ति नम्रास्तरवः फलोद्गमैः।
क. नम्राः + तरवः ख. नम्र + तरवः ग. नाम्र्स + तरवः घ. नमर्स + तरवः

**प्रश्न 10. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : - (1x3=3)**

1. रामः पठितुम् विद्यालयम् गच्छति।
क. पठ् + तुमुन् ख. पठी + तुमुन् ग. पठ + तुम घ. पथि + तुम
2. सरस्वतीम् नम् + क्त्वा पाठम् पठ।
क. नमित्वा ख. नत्त्वा ग. नत्वा घ. नन्तवा
3. त्वम् गृहम् आ + गम् + ल्यप्
क. आगमित्वा ख. आगम्य ग. आगत्वा घ. आगंम्य

**प्रश्न 11. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : - (1x4=4)**

1. ---------- अयोध्यायाः राजा दशरथः आसीत्।
क. सदा ख. विना ग. पुरा घ. सहसा
2. मूर्खजनाः समयम् --------- यापयन्ति।
क. मृषा ख. कदापि ग. मा घ. वृथा

(ii) ज्ञानम् ----------- न जीवनम्।

(क) वृथा (ख) विना (ग) तथा (घ) अपि

(iii) ----------- विदधीत न क्रियाम्।

(क) अचानक (ख कदा (ग) सहसा (घ) उच्चैः

**प्रश्न 12. प्रदत्त विकल्पस्य उचितम् उत्तरं चित्वा लिखत : - (1x4=4)**

1.भासः ---------- (13) नाटकानि अलिखत्।
क. त्रयोदशी ख. त्रयोदश ग. त्र्योदशानि घ. त्र्योदशाः
2. मम ---------- (4) मित्राणि सन्ति।
क. चत्वारि ख. चत्वारो ग. चत्वारः घ. चतसरः
**3.** गृहे --------(4)चित्राणि सन्ति**|**
क. चत्वारि ख. चत्वारः ग. चतसर घ. चतस्रः
**4.**---------(**2**) महिले गच्छतः **|**
क. द्वे ख. द्वौ ग.द्वि घ. द्वय

**[खण्डः (घ) - पठित-अवबोधनम् - 30 अङ्काः**

**प्रश्न 11.** अधोलिखित-**गद्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

किन्तु बालस्य अत्र रक्षकः नास्ति । तत् किं करोमि? भवतु, चिरकालपालितम् इमं पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि। तथा कृत्वा गतः । ततस्तेन नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्पः दृष्टः । स तं व्यापाद्य खण्डशः कृतवान् । अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत्तः । ब्राह्मणं दृष्ट्वा नकुलः रक्त-विलिप्त-मुख-पादः तस्य

चरणयोः अलुठत् । विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान्। अनन्तरं यावत् उपसृत्य अपत्यं पश्यति तावद् बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति ।

**(I) एकपदेन उत्तरत**- **(1/2x2=1)**

(i) ब्राह्मणं दृष्ट्वा तस्य कः चरणयोः अलुठत् ?

(ii) 'अत्रान्तरे कः श्राद्धं गृहीत्वा गृहम् उपावृत्तः?

**(II) पूर्णवाक्येन उत्तरत-** **(2)**

ततस्तेन केन बालसमीपम् उपसर्पन् कृष्णसर्पः दृष्टः?

**(III) भाषिककार्यम् -** **(1x2=2)**

(क) 'अस्ति उज्जयिन्यां माधवः नाम विप्रः । अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम् ?

(ख) 'किन्तु बालस्य अत्र रक्षकः नास्ति।' अत्र किं कर्तृपदं वर्तते ?

**प्रश्न 12. अधोलिखित-पद्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः । अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ॥

(I) एकपवेन उत्तरत - **(1/2x2=1)**

(i)क्षमा केषाम् विभूषणम् ? (ii) सुजनता कस्य आभूषणम् ?

(II) पूर्णवाक्येन उत्तरत- **(2)**

(i) वित्तस्य विभूषणं किम् ?

(III) भाषिककार्यम् – **(1x2=2)**

(i) 'आयः' इति पदस्य कः विपर्ययः श्लोके आगतः ? (क) क्षमा (ख) व्ययः (ग) पात्रे (घ) विनयः

(i) 'शान्ति' पदस्य कः पर्यायः श्लोके प्रयुक्तः वर्तते ? (क) क्षमा (ख) निर्व्याजता (ग) उपशमः (घ) तपसः

**प्रश्न 13. अधोलिखित-नाट्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

प्रतापः - धिङ् माम् अधन्यम् , योहम् मातृभूमिम् रक्षितुम् असमर्थः। अलं मम एतेन जीवितेन। (दीर्घम् निःश्वसिति)

(यावत् सहचराः तस्य आकृतिम् दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चित् मेवाडराजपुत्रः)

राजपुत्रः - (राजोचितम् प्रणम्य) विजयताम् महाराजः , विजयताम्।

प्रतापः - (समाश्वस्य) अयि भ्रातः! कथं जयघोषम् कृत्वा माम् लज्जयसे?

राजपुत्रः - देव ! कथं भवान् वदति एवम् ? किम् न खलु कृतं भवता राज्यत्राणाय ?

**(I)** एकपदेन उत्तरत- **(1/2x2=1)**

(i) प्रतापः काम् रक्षितुम् असमर्थः आसीत् ?

(ii) कः दीर्घम् निःश्वसिति ?

**(II)** पूर्णवाक्येन उत्तरत- **(2)**

प्रतापः किम् श्रुत्वा लज्जाम् अनुभवति ?

**(III)** भाषिककार्यम् – **(1x2=2)**

(क) 'सहचराः तस्य आकृतिम् दृष्ट्वा व्याकुलाः भवन्ति।' अस्मिन् वाक्ये कर्तृपदम् किम् ?

(ख) अयि भ्रातः! कथं जयघोषम् कृत्वा माम् लज्जयसे? अस्मिन् वाक्ये क्रियापदम् किम् ?

**प्रश्न 14. अधोलिखितवाक्येषु रेखांकितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –** **(1x5=5)**

क. **<u>वीरगत्या</u>** मरणमेव कल्याणप्रदम् भवति।

ख. **<u>परतन्त्रे</u>** देशे जीवनम् नरकायते ।

ग. **भामाशाहः** धनराशिम् आदाय आगच्छति।

घ. भिल्लाः **मातृभूमेः** दुर्दशाम्  नैव द्रष्टुम् शक्नुवन्ति।

ङ  सर्वे भटाः **देशरक्षायै** बद्धपरिकराः आसन्।

**प्रश्न 15. अधोलिखितैः पदैः वाक्यानि प्रपूर्य कथासूत्रम् योजयत –** (1/2x8=4)

**मंजूषा**

| |
|---|
| बालसमीपम् , चिरकालपालितम् , खण्डशः , कोपात् , व्यवस्थाप्य, गृहीत्वा, चरणयोः , बालकोऽनेन, |

किन्तु बालस्य अत्र रक्षकः नास्ति । तत् किं करोमि? भवतु, (i) -------------------- इमं पुत्रनिर्विशेषं नकुलं बालरक्षायां (ii) --------------------- गच्छामि। तथा कृत्वा गतः । ततस्तेन नकुलेन (iii)--------------- उपसर्पन् कृष्णसर्पः दृष्टः । स तं व्यापाद्य (iv) ------------------ कृतवान् । अत्रान्तरे ब्राह्मणोऽपि श्राद्धं (v) ---------------------------- गृहम् उपावृत्तः । ब्राह्मणं दृष्ट्वा नकुलः रक्त-विलिप्त-मुख-पादः तस्य (vi) ------------------------- अलुठत् । विप्रः तथाविधं तं दृष्ट्वा (vii) ---------------- खादितः इति अवधार्य (viii) ----------------------- नकुलं व्यापादितवान्।

**प्रश्न 16.अधोलिखित-श्लोक<u>स्य</u> अन्वयं मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत : -   (1/2x4=2)**

गच्छन् पिपीलको याति योजनानाम् शतान्यपि।        अगच्छन् वैनतेयोपि पदमेकं न गच्छति।।

**अन्वयः -** गच्छन् (i) --------------- योजनानाम् (ii) ---------------- शतान्यपि। अगच्छन् (iii)----------------- पदमेकं न (iv) --------------------- ।।

**मंजूषा**

| |
|---|
| **याति,  पिपीलको, गच्छति, वैनतेयोपि** |

**प्रश्न 17. अधोलिखितेषु शुद्धम् अर्थम् चित्वा लिखत : -** (1x4=4)

**1. तरुः** -   (वृक्षः / महीभृतः)  **2. पयोदः** - (सागरः / मेघः)

**3. आपः** -  (जलम् / वर्षा)  **4. भूमिः** -  (पृथ्वी / महीपतिः)